नात् रेफस्य ऋकारः । म, क्रमयति । उ, क्रमते दयालुर्दीनम् । इति दुर्गादासः ॥

क्रम, उ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) उ, क्रमित्वा क्रान्त्वा क्रन्त्वा । क्रामति । वारिपूर्णां मही ह्यत्वा पश्चात् संक्रमते गुरुरिति संप्रव्द्स्योपसर्गप्रतिरूपकत्वे वागेरित्यात्मनेपदम् । वस्तुतस्तूद्गतायनेभ्यपसर्गान्तरपूर्व्वादप्यात्मनेपदमिति प्रशस्तदेवः । संक्रामयतीत्यादि तु संक्रामन्तं करोतीति प्रयन्तात् णौ साध्यम् । अन्यथा अमन्तत्वाद्ध्रस्वः स्यात् । हरेर्यदक्रामि पदैकेन खमिति तु धातुपारायणमते चुरादिविवक्षया सिद्धम् । तन्मतन्तु परिभाषायां लिखितम् । अथवा आत्मेति कर्म्मणोऽध्याहारे प्रेरणे णौ साध्यम् । हरेः पदं आत्मानं यत् खं क्रामयामास । इत्यर्थः । इति दुर्गादासः ॥

क्रम, य गतौ । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-सेट् ।) य, क्राम्यति । गोविन्दभट्टक्रमदीश्वरौ तु दीर्घं विधाय । क्राम्यतीत्याहतुः । तथा च ।
"इष्यते शमि दीर्घत्वं दाक्षिणात्यबुधैर्दिभिः ।
तेन क्राम्यति कौमारे शमीत्यस्योपलक्षणात्" ॥
इति दुर्गादासः ॥

क्रमः, पुं, (क्रम्यते प्राप्यते पाठभेदो ऽनेन । क्रम + घञ् । "नोदात्तोपदेशस्येति" । ७ । ३ । ३४ । इति न वृद्धिः ।) वैदिकविधानम् । तत्पर्य्यायः । कल्पः २ विधिः ३ । इत्यमरः । २ । ७ । ४० ॥ (क्रम + भावे घञ् ।) अनुक्रमः ।
(यथा, रघुः । ११ । २४ ।
"लोकमन्धतमसात् क्रमोदितौ
रश्मिभिः शशिदिवाकराविव" ॥)
शक्तिः । आक्रमणम् । इति मेदिनी ॥ (क्रामत्यनेन घञ् न वृद्धिः ।) चरणः । इति हेमचन्द्रः ॥ (स्वनामख्यातो वत्सप्रीपुत्त्रः ।
यथा, मार्कण्डेये ११८ । १ ।
"तस्य तस्यां सुनन्दायां पुत्त्रा द्वादश जज्ञिरे ।
प्रांशुः प्रवीरः शूरश्च सुचक्रो विक्रमः क्रमः" ॥
सर्व्वाक्रमणात् रुद्रः ।
यथा, महाभारते । १३ । १७ । १२९ ।
"कृत्स्नं सुच्छ्चो विख्यातो लोकः सर्व्वाश्रयः क्रमः"॥
त्रिपादेन सर्व्वाक्रमणात् विष्णुः ।
यथा, तत्रैव १३ । १४९ । २२ ।
"ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः" ॥)

क्रमकः, पुं, (क्रमं वेदपाठभेदं अधीते वेत्ति वा । "क्रमादिभ्यो वुन्" । ४ । २ । ६१ । इति वुन् ।) क्रमज्ञः । इति मुग्धबोधम् ॥

क्रमणः, पुं, (क्रामत्यनेन करणे ल्युट् ।) चरणः । इति हेमचन्द्रः ॥ (यदुवंशीयनृपविशेषः । यथा हरिवंशे ।
"क्रमिश्च क्रमणश्चैव दृष्टः शूरः पुरञ्जयः" ॥
क्ली । भावे ल्युट् । पादविक्षेपः । यथा, भागवते ८ । १० । २१ ।
"एके त्वधर्म्मे क्रमणेषु वक्षम्" ॥)

क्रमपूरकः, पुं, (क्रमेण पूरयति बीजम् । पूर + णिच् ण्वुल् । पुष्पवृन्ते क्रमेणास्य बीजपूरकत्वात् तथात्वम् ।) वकवृक्षः । इति राजनिर्घण्टः ॥

क्रमशः, [स्] व्य, (कारकार्थवृत्तेः क्रमात् + वीप्सायां शस् ।) क्रमेण क्रमेण । क्रमेक्रमे इति भाषा । यथा । "भवति विज्ञतमः क्रमशो जनः" । इति प्राचीनाः ॥ (तथा च मनौ । ३ । १२ ।
"सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्म्मणि ।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः" ॥)

क्रमागतं, त्रि, (क्रमेणागतं आयातम् ।) क्रमायातम् । पितृपितामहादिक्रमेण प्राप्तम् । यथा,—
"अस्वतन्त्राः स्त्रियः सर्व्वाः पुत्त्रदासपरिग्रहाः ।
अस्वतन्त्रस्तु गृही यत्र तत् स्यात् क्रमागतम्" ॥
इति व्यवहारतत्त्वे नारदः ॥ (तथा च मनुः । २ । १८ ।
"तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते" ॥)

क्रमायातः, त्रि, (क्रमेणायातः आगतः ।) क्रमागतः । इति मिताक्षरा ॥

क्रमिः, पुं, (क्रम् + इन् ।) क्रमिः । इति भरतो द्विरूपकोषः ॥ रोगविशेषः । तच्चिकित्सा यथा,
"विडङ्गव्योषसंयुक्तमन्नमण्डं पिबेन्नरः ।
दीपनं क्रिमिनाशाय जठराग्निविवर्द्धये ॥
प्रत्यहं कटुकं तिक्तं भोजनं कफनाशनम् ।
क्रिमीणां नाशनं श्रेष्ठमग्निसन्दीपनं परम् ॥
विडङ्गशृतपानीयं विडङ्गेनावधूलितम् ।
पीतं क्रिमिहरं दृष्टं क्रिमिजांश्च गदान् जयेत् ॥
लिह्याद्विडङ्गचूर्णं वा मधुना क्रिमिनाशनम् ।
पलाशबीजस्य रसं पिबेन्माक्षिकसंयुतम् ॥
पिबेत्तद्बीजकल्कं वा तक्रेण क्रिमिनाशनम् ।
काम्पिल्लचूर्णकर्षार्द्धं गुड़ेन सह भक्षितम् ॥
पातयेत क्रिमीन् सर्व्वानुदरस्थान्न संशयः ।
विड़ङ्गं कौटजं बीजं तथा बीजं पलाशजम् ॥
संचूर्ण्य खादेत् खण्डेन क्रिमीन्नाशयितुं नरः ।
निम्बपत्त्रसमुद्भूतं रसं क्षौद्रयुतं पिबेत् ॥
धुस्तूरपत्त्रजं वापि क्रिमिनाशनमुत्तमम् ।
रसेन्द्रेण समायुक्तो रसो धुस्तूरपत्त्रजः ॥
ताम्बूलपत्त्रजो वापि लेपाद्यूकाविनाशनः ।
धत्तूरपत्रकल्केन तद्रसेनैव पाचितम् ॥
तैलमभ्यङ्गमात्रेण यूकान्नाशयति क्षणात् ।
क्रिमीणां विट्कफोत्थानामेतदुक्तं चिकित्सितम् ॥
रक्तजानान्तु संहारं कुर्य्यात् कुष्ठचिकित्सया ॥
क्षीराणि मांसानि घृतानि वापि
दधीनि शाकानि च पर्णवन्ति ।
अम्लञ्च मिष्टञ्च रसं विशेषात्
क्रिमीन् जिघांसुः परिवर्ज्जयेद्धि" ॥
इति क्रिम्यधिकारः । इति भावप्रकाशः ॥

क्रमिकण्टकं, क्ली, (क्रमौ क्रमिनाशे कण्टकमिव । तस्य नाशकत्वात्तथात्वम् ।) चित्राङ्गः । विड़ङ्गम् । उडुम्बरः । इति मेदिनी ॥

क्रमिघ्नं, क्ली, (क्रमिं हन्ति । हन् + टः ।) विड़ङ्गम् । इति रत्नमाला ॥

क्रमिजं, क्ली, (क्रमेः क्रमिभ्यो वा जायते इति । जन् + डः ।) अगुरु । इत्यमरः ॥

क्रमिजा, स्त्री, (क्रमिज + टाप् ।) लाक्षा । इति रत्नमाला ॥

क्रमिशत्रुः, पुं, (क्रमेः क्रमीणां वा शत्रुरिव नाशकत्वात् ।) विड़ङ्गः । इति रत्नमाला ॥

क्रमुः, पुं, (क्रम + बाहुलकादुः ।) गुवाकः । इति भरतो द्विरूपकोषश्च ॥

क्रमुकः, पुं, (क्रमु + संज्ञायां कन् ।) पट्टिकालोध्रः । गुवाकवृक्षः । ब्रह्मदारुवृक्षः । इत्यमरः । २ । ४ । ४१ ॥ भद्रमुस्तकम् । कार्पासिकाफलम् । इति मेदिनी ।

क्रमुकफलं, क्ली, (क्रमुक एव फलम् । क्रमुकस्य गुवाकादिवृक्षस्य फलं वा ।) गुवाकम् । इति राजनिर्घण्टः ॥ (यथा, माघे ।
"आस्वादितार्द्रक्रमुकाः समुद्रात्" ॥
क्रमुकाः क्रमुकफलानीत्यर्थः ॥) अस्य गुणपर्य्यायौ गुवाकशब्दे ज्ञातव्यौ ॥

क्रमुकी, स्त्री, (क्रमुक + स्त्रियां गौरादित्वात् ङीष् ।) गुवाकः । इति शब्दरत्नावली ॥

क्रमेलः, पुं, (क्रममालम्ब्य एलति गच्छतीति । एल + अच् ।) उष्ट्रः । इत्युणादिकोषः ॥

क्रमेलकः, पुं, (क्रममालम्ब्य एलति गच्छति । एल-गतौ + ण्वुल् । यद्वा, क्रमेल + स्वार्थे कन् ।) उष्ट्रः । इत्यमरः २ । ९ । ७५ ॥ (यथा पञ्चतन्त्रे । १ । ४१४ ।
"भो ममाग्रेऽपि क्रमेलकहृदयं भक्षयित्वा अधुना मम मुखमवलोकयसि" ॥)

क्रमोद्वेगः, पुं, (क्रमेण उद्गतः उत्क्रान्तो वा वेगो यस्य ।) वृषः । इति भूरिप्रयोगः ॥

क्रयः, पुं, (क्री + भावे अच् ।) पणपूरणादिमूल्यदानेन विक्रेतुः स्वत्वापनयनेन स्वत्वापादनव्यापारविशेषः । मूल्येन द्रव्यग्रहणम् । केना इति भाषा । यथा,—
"प्रकाशं वा क्रयं कुर्य्यात् मूल्यं वापि समर्पयेत्" ॥
इति प्रायश्चित्ततत्त्वे वृहस्पतिः ॥

क्रयलेख्यं, क्ली, (क्रयस्य क्रये क्रयमधिकृत्य वा लेख्यम् ।) भूम्यादिक्रयलिपिः । कवाला इति पारस्य भाषा । यथा,
"गृहं क्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम् ।
पत्त्रं कारयते यत्तु क्रयलेख्यं तदुच्यते" ॥
इति प्रायश्चित्ततत्त्वे वृहस्पतिः ॥

क्रयविक्रयः, पुं, (क्रयेण सह विक्रयः ।) वाणिज्यम् । केना वेचा इति भाषा । यथा,—
"ऋणादानं तथादानं वस्तूनां क्रयविक्रयम् ।
न कुर्य्यात् गुरुणा सार्द्धं शिष्यो भूत्वा कदाचन" ॥
इति तन्त्रसारः ॥
(केचित्तु एतौ द्विवचनान्ताविच्छन्ति । तत्र द्वन्द्वः यथा, क्रयश्च विक्रयश्च तौ क्रयविक्रयौ ।
यदुक्तं मनुसंहितायाम् ।
"आगमं निर्गमस्थानं तथा वृद्धिक्षयावुभौ ।
विचार्य्य सर्व्वपण्यानां कारयेत् क्रयविक्रयौ ॥
पञ्चरात्रे पञ्चरात्रे पक्षे पक्षे ऽथवा गते ।